# શ્રીનન્દીશ્વરાષ્ટકમ્

Shri Nandishvarashtakam

sanskritdocuments.org

March 16, 2019

# Shri Nandishvarashtakam

# શ્રીનન્દીશ્વરાષ્ટકમ્

## Sanskrit Document Information

Text title : nandIshvarAShTakam

File name : nandIshvarAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીનન્દીશ્વરાષ્ટકમ્

સાક્ષાન્મહત્તમમહાઘનચિદ્વિલાસ
    પુઞ્જઃ સ્વયં શિખરિશેખરતામુપેતઃ ।
યત્રેશ્વરઃ સ ખલુ નન્દતિ યેન વેતિ
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૧॥

બ્રહ્માણ્ડવપ્રગતલોકનિકાયશસ્ય
    સન્તર્પિ કૃષ્ણચરિતામૃતનિર્ઝરાઢ્યઃ ।
પર્જન્યસન્તતિસુખાસ્પદપૂર્વકો યો
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૨॥

યત્સૌભગં ભગવતા ધરણીભૃતાપિ
    ન પ્રાપ્યતે સુરગિરિઃ સ હિ કો વરાકઃ ।
નન્દઃ સ્વયં વસતિ યત્ર સપુત્રદારો
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૩॥

યત્ર વ્રજાધિપપુરાપ્રતિમપ્રકાશ
    પ્રાસાદમૂર્ધકલશોપરિનૃત્યરઙ્ગી ।
બર્હીક્ષ્યતે ભુવિ જયધ્વજકેતુભૂતો
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૪॥

યચ્છૃઙ્ગસઙ્ગતસુગન્ધશિલાધિરૂઢઃ
    કૃષ્ણઃ સતૃષ્ણનયનઃ પરિતો વ્રજાબ્જમ્ ।
આલોક્યતે દ્વિષડુદારદલાટવીસ્તા
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૫॥

જિગ્યે યદીયતટરાજિસરોજરાજિ
    સૌરભ્યમઞ્જુલસરોજલશીકરેણ ।
ત્રૈલોક્યવર્તિવરતીર્થયશો રસૌઘૈ-
    ર્નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૬॥

યત્તીરસઙ્ગિપવનૈરભિમૃશ્યમાનાઃ
    સ્યુઃ પાવના અપિ જનાઃ સ્વદશાં પરેષામ્ ।
સા પાવનાખ્યસરસી યદુપત્યકાયાં
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૭॥

કૃષ્ણાખ્યમસ્તિ મહદુજ્જ્વલનીલરત્નં
    સૂતે તદેવ વસુ તત્સ્વભુવૈવ દૃષ્ટમ્ ।
તલ્લભ્યતે સુકૃતિનૈવ યદીયસાનૌ
    નન્દીશ્વરઃ સ મદમન્દમુદં દધાતુ ॥ ૮॥

દુર્વાસનાશતવૃતોઽપિ ભવત્પ્રયત્નઃ
    પદ્યાષ્ટકં પઠતિ યઃ શિખરીશ તુભ્યમ્ ।
કૃષ્ણાઙ્ઘ્રિપદ્મરસ એવ સદા સતૃષ્ણં
    એતં જનં કુરુ ગુરુપ્રણયં દધાનમ્ ॥ ૯॥

ઇતિ મહામહોપાધ્યાયશ્રીવિશ્વનાથચક્રવર્તિવિરચિતં
        શ્રીનન્દીશ્વરાષ્ટકં સમાપ્તમ્ ।

*Shri Nandishvarashtakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*